# Abhrasabhantare Shivatandavavigrahavarnanam

# અભ્રસભાન્તરે શિવતાણ્ડવવિગ્રહવર્ણનમ્

## Document Information

Text title : Abhrasabhantare Shivatandavavigrahavarnanam

File name : abhrasabhAntareshivatANDavavigrahavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 21 (chit)sabhAdarshanam | 41-50||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# અભ્રસભાન્તરે શિવતાણ્ડવવિગ્રહવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)
પ્રાણંસીદવતંસિતેન્દુમનલાલઙ્કારભાલાક્ષધૃ-
ગ્ધસ્તોત્તેજિતવાङ્કુમધ્વનિભૃતાસદ્રામરેણામ્બિકામ્ ।
પશ્યન્હેમસભાવિભાસિચરણામ્ભોજં હિ રક્ષોગણા-
ધ્યક્ષાક્ષ્ય્યગતિપ્રદાનકુશલં વિન્યસ્ય નૃત્તં સદા ॥ ૪૧॥

કુર્વન્તં ચલલોલલમ્બિતજટાસામ્રાજ્ય વિત્રાંસિત-
નક્ષત્રોડુપ તત્સુવર્ષણઝણત્કારોરુસત્કઙ્કણમ્ ।
સવ્યાસવ્યકરદ્વયારુણલતાભ્રાજત્સુભીતિં હર-
લ્લોકાનામભયપ્રદાનકુશલં ચાન્યેન ચાલમ્બિના ॥ ૪૨॥

પાદેનોરુ નિકુઞ્ચિતેન મધુના સંસિઞ્ચતા સિઞ્જિતા
લોલાલમ્બિતપાદકઙ્કણફણીફૂત્કારલોલસ્રજા ।
બ્રાહ્મોત્તુઙ્ગકરઙ્કષણ્ડસુમહારત્નોરુમાલાંશુક-
ભ્રાજદ્વક્ત્રસમુલ્લસદ્યુતિભૃતા પર્વેન્દુપૂર્ણશ્રિયા ॥ ૪૩॥

સોમાનલાર્કસુકટાક્ષરસાવલોકૈ-
રાલોક્ય લોકમખિલં શરદિન્દુકુન્દમ્ ।
કાન્તાયિતાઙ્ગ સુભુજાઙ્ગમહોરુહારં
માતઙ્ગકૃત્તિવસનં હૃદયાન્તરઙ્ગે ॥ ૪૪॥

તત્પાર્શ્વગામચલરાજસુતાં નતાં ત-
ત્પાદામ્બુજાન્તરદૃગઞ્ચલકાં દદર્શ ।
ઉત્ફુલ્લપદ્મવદનોત્થિતનીલનીર-
જાતેક્ષણાઞ્ચિતકપોલતલાયતાક્ષીમ્ ॥ ૪૫॥

કર્ણાન્તરોધતસુરત્નજ કાન્તિકાન્ત-
તાટઙ્કયુગ્મવિનિવાર્યરવીન્દુબિમ્બામ્ ।
બિમ્બાધરાં ચિકુરવેણિગરત્નપદ્માં

શુક્રોયમોરુનસલમ્બિતમૌક્તિકાં તામ્
(શુક્રાધિકોરુનસલમ્બિતમૌક્તિકાં તામ્) ॥ ૪૬॥

ગ્રૈવેયકાવલિભવોત્તમકમ્બુકણ્ઠીં
શ્રીનીલકણ્ઠહૃદયામ્બુજ કેલિભૃઙ્ગીમ્ ।
પાણિપ્રભાવિજિતતામરસોરુનાલ-
બાહુદ્વયીવિધૃતકઙ્કણનિઃસ્વનાં તામ્ ॥ ૪૭॥

હીરાત્તભાલફલકાન્તલસત્સુરેખાં
સિન્દૂરબિન્દુવદનાં રદશોભિકુન્દામ્ ।
કૌસુમ્ભચેલગકૃતાઞ્ચલકાન્તશાત-
કુમ્ભોત્તરીયવિનિબદ્ધમદેભકુમ્ભામ્ ॥ ૪૮॥

તદ્ભ્રાજિસલ્લિકુચવર્ણકુચાનતાઙ્ગ-
બદ્ધપ્રભાત્રિવલિતોદરમધ્યભાગામ્ ।
રત્નોરુહેમખચિતોત્તમચાકચક્ય-
કાઞ્ચીકચત્કટિતટાઞ્ચિતમૌક્તિકાં તામ્ ॥ ૪૯॥

રમ્ભાનિભોરુકમઠીનિભપૃષ્ઠલગ્ન
લાક્ષારુણાઙ્ઘ્રિયુગલાં મણિનૂપુરાં તામ્ ।
મત્વા હૃદમ્બુરુહમોદવિકાસિતાક
તુષ્ટાવ સુન્દરગિરા સ ચ સુન્દરોઽપિ ॥ ૫૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અભ્રસભાન્તરે શિવતાણ્ડવવિગ્રહવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૨૧ (ચિત્)સભાદર્શનમ્ । ૪૧-૫૦॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 21 (chit)sabhAdarshanam . 41-50..

Notes:
Sundara સુન્દર; one of the sixty-three Nāyanāra-s, after being born in Pṛthvīloka પૃથ્વીલોક, worships and eulogizes Śiva શિવ at Puṇḍarīkapuram પુણ્ડરીકપુરમ્ where Śiva શિવ conducts His Divine Dance - the Taṇḍavam તાણ્ડવમ્ along with Śivā શિવા in the Abhrasabhā અભ્રસભા (Kanakasabhā કનકસભા) to the satisfaction of Sundara સુન્દર.

Proofread by Ruma Dewan

*Abhrasabhantare Shivatandavavigrahavarnanam*

pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*